# संस्कृत वार्ता:

दिनाङ्क : 12/08/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- सहकारिता-क्षेत्रस्य संवर्धनाय वित्तीयानुदान-वृद्धि-विधेयकं संसदा पारितम्।
- गृहमन्त्री अमितशाहः प्रोक्तवान् यत् सर्वकारः सर्वेषु विषयेषु चर्चायै सन्नद्धः:, संसद्-सञ्चालनाय विपक्षात् विहितः आग्रहः ।
- युवानः आत्मचरितानि पठेयुः रील्स इति युगस्य लघु-मार्गान् परिहरेयुः: इत्यगादीत् प्रधानमन्त्री नरेन्द्रमोदी ।
- हर घर तिरङ्गा इत्यभियानं गतिं भजते , उपराष्ट्रपतिः सि०पी० राधाकृष्णन् अवदत् यत् वन्दे मातरम् इति भावना राष्ट्रियात्मनः सशक्तीकरणं करोति।
- अमरीका-देशस्य सेन्ट्-लुइस्-नगरे आयोज्यमानस्य सिंक्फील्ड्-चषकस्य द्वितीय-चक्रे भारतीय-ग्रैण्डमास्टर् आर० प्रज्ञानन्दः जवाखिर्-सिन्दारोव् इत्येतं पराजितवान्।
- राष्ट्रमण्डल-स्पर्धायाम् भारतीय-दलेन नाइजिरियायाः लागोसनगरे तृतीयदवसे स्वायत्तीकृतानि पञ्चपदकानि ।

-----------------------------------------------------------

<u>लोकसभा-विधेयकम्</u>

लोकसभया अद्य वैदेशिक-अंशदान-संशोधन-विधेयकम् षड्विंशत्यधिक-द्विसहस्रतमं विस्तृत-परीक्षणाय संयुक्त-संसदीय-समितये प्रेषितम्। एतत् विधेयकं दशाधिक-द्विसहस्रतमस्य वर्षस्य मूलाधिनियमस्य संशोधनार्थम् आनीतम् अस्ति। अस्य विधेयकस्य मुख्योद्देश्यं वैदेशिक-अनुदानानां प्रयोगं अधिकाधिकं पारदर्शिकम् उत्तरदायित्वपूर्णं च विधातुम् अस्ति। गृह-राज्यमन्त्री नित्यानन्द रायः व्यापक-परामर्शार्थं एतं विधेयकं उभयोः सदनयोः सांसदयुक्तायाः जे०पी०सी०-समित्याः पार्श्वे प्रेषयितुं प्रस्तावम् उपस्थापितवान्। तेनोक्तं यत् अस्यां समितौ लोकसभायाः एकविंशति-सदस्याः अथ च राज्यसभायाः दश-सदस्याः भविष्यन्ति। रायः असूचयत् यत् एषा समितिः शीतकालीन-सत्रस्य प्रथम-सप्ताहस्य अन्तिम-दिनाङ्कं यावत् स्वकीयं वृत्तं सदने उपस्थापयिष्यति।

-----------------------------------------------------------

## प्रधानमन्त्री - विमोचनम्

प्रधानमन्त्री नरेन्द्रमोदी अद्य यूनाम् आह्वानम् अकरोत् यत् ते स्वीय-प्रेरणास्रोतसां आत्मचरितानि पठेयुः, सहैव अन्तर्जालीयेऽस्मिन् युगे जीवनस्य लघु-मार्गान् परिहरेयुः। तेन विकसित-भारतस्य सङ्कल्पं अग्रे नेतुम् कर्मठ-युवकानाम् अविरत-आवश्यकतायाः उपरि अपि बलम् दत्तम्। सः तादृशस्य वंशस्य निर्माणाय आह्वानम् अकरोत् , यः बाधाः परिहार्य राष्ट्रिय-आत्मनिर्भरतायाः मार्गे धैर्यपूर्वकम् अग्रे सरेत्।

प्रधानमन्त्री नवदिल्ल्यां पूर्व-राष्ट्रपतिनः रामनाथ-कोविन्दस्य ट्रायम्फ् ऑफ द इण्डियन् रिपब्लिकः माइ लाइफ, माइ स्ट्रगल्स्' इति शीर्षक-युक्तस्य पुस्तकस्य विमोचनावसरे एतत् प्राख्यापयत् । प्रधानमन्त्री मोदी देशस्य युव-वंशं रामनाथ-कोविन्दस्य जीवन-यात्रां तस्यैव शब्देषु ज्ञातुं अथ च तस्य लेखनानि अनुभवांश्च पठितुम् आग्रहमकरोत्। सः अकथयत् यत् महात्मा गान्धी, बाबासाहेब अम्बेडकरः, ज्योतिबा फुले, सावित्रीबाई फुले इत्यादयः महापुरुषाः तादृशस्य पुनर्मानित-भारतस्य स्वप्नम् अपश्यन्, यत्र दरिद्रः वञ्चितः नागरिकः उच्चतमं पदं प्राप्नुयादिति।

-----------------------------------------------------------

## शाह - संसद्

केन्द्रीय-गृहमन्त्री अमित-शाहः अद्य प्रावोचत् यत् सर्वकारः छात्र-विषयमधिकृत्य कस्मिंश्चिदपि विषये संसदि चर्चायै तथा च प्रश्नानाम् उत्तराणि च दातुं पूर्णतया सन्नद्धो वर्तते। संसद्-प्राङ्गणे वार्ताहरैः सह सम्भाषमाणः शाहः न्यगादीत् यत् सर्वकारस्य पार्श्वे गोपयितुं किमपि नास्ति, स च विचार-विमर्शाय तत्परो विद्यते।

अपरतः लोकसभायां विपक्षस्य नेता राहुल गान्धी अवदत् यत् नीट्-प्रदर्शनकारि-छात्रान् विरुध्य आरक्षकाणां विरुद्धाचरणम् अधिकृत्य विपक्षः सर्वकारात् उत्तरं याचते। संसद्-परिसरे वर्ताहरैः

सह संवादक्रमे असौ प्रोक्तवान् यत् विपक्षस्य रुचिः केवलं गृहमन्त्रिणः वक्तव्ये नास्ति, अपितु सर्वकारस्य उत्तरदायित्व-निर्धारणे वर्तते।

-----------------------------------------------------------

## उपराष्ट्रपतिः सी. पी. राधाकृष्णन्

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अवदत् यत् वंदे मातरम् इत्यस्य भावेन भारतस्य स्वातन्त्र्य-सङ्घर्षं प्रेरितम्, अद्यत्वे अपि राष्ट्रस्य परिचयं सुदृढम् करोति। राष्ट्रगीतस्य सार्धैक-वर्षाणां पूर्त्यवसरे संस्कृति-मन्त्रालयेन आयोजिते हर् घर् तिरङ्गा द्विचक्रिकायान- यात्रायां प्रतिभागिनः सम्बोधयन् सः एतत् उक्तवान्। उपराष्ट्रपतिः अवदत् यत् वंदे मातरम् इत्यस्य शब्दैः देशभक्तिः प्रज्वलितं तथा च औपनिवेशिकशासनस्य विरुद्धं युद्धे प्रदेशेषु, भाषासु, धर्मेषु, पृष्ठभूमौ च जनानां ऐक्यम् आनीतम्। सः वीर-सावरकरस्य, नेताजी-सुभाष-चन्द्र-बोसस्य, तिरुपुर-कुमारस्य इत्यादीनां स्वातन्त्र्ययोद्धानां त्यागस्य स्मरणं कृत्वा, तेषां साहसेन वंदे मातरम् इत्यस्य चैतन्यं जीवितं स्थापितम् इति उक्तवान्।

-----------------------------------------------------------

## मुरुगन् ए. आई. स्किलिङ्ग्

सर्वकारेण अद्य सूचितं यत् नैशनल् ए. आई. स्किलिङ्ग् इनिशियेटिव् इत्यस्य प्रथमे चरणे प्रायः सपाद-षष्ठी-सहस्राधिकानि नामाङ्कनानि जातानि। सूचना-प्रसारण-राज्यमन्त्री डा. एल्. मुरुगन् वर्यः लोकसभायां लिखिते प्रत्युत्तरे अवदत् यत् आहत्य विंशत्यधिक-षट्शताधिक-चतुःसहस्रं यावत् प्रतिभागिनः प्रथमस्य चरणस्य माड्यूल्-द्वयं सम्पन्नं कृतवन्तः। सः अग्रे अवदत् यत् द्विपञ्चाशदधिक-पञ्चशतं यावत् प्रतिभागिनः कार्यक्रमस्य प्रथमस्य चरणस्य चतुर्णां माड्यूल्-विशेषान् सम्पूर्णं कृतवन्तः। पाठ्यक्रमं, माड्यूल्, पाठ्यक्रमस्य अवधिः इत्यादीनां द्वितीयस्य चरणस्य विवरणानि अन्तिमावस्थायां सन्ति।

-----------------------------------------------------------

## रेलवे-उर्ध्वसेतुः

भारतीय-रेलवे-मन्त्रालयेन पश्चिम-रेलवे-मण्डलस्य गेरातपुर-अहमदाबाद-खण्डे चतुष्पथीय-मार्ग-उर्ध्व-सेतोः निर्माणाय त्रिपञ्चाशदधिकैकशत-कोटिरुप्यकाणां परियोजना स्वीकृता। रेलवे-मन्त्रालयेन सूचितं यत् एषा परियोजना अम्ब्रेला-कार्यस्य अन्तर्गतम् स्वीकृता अस्ति। मन्त्रालयेन स्पष्टीकृतं यत् अस्य रेल-सेतु-भागस्य आहत्य दैर्घ्यं षडाधिकैकशत-मीटरमितं भविष्यति।

-------------------------------------------------------------

<u>क्रीडा</u>

अमरीका-देशस्य सेन्ट्-लुइस्-नगरे आयोज्यमानायाः सिंक्फील्ड्-चषकस्य द्वितीय-चक्रे भारतीय-ग्रैण्डमास्टर् आर० प्रज्ञानन्दः जवाखिर्-सिन्दारोव् इत्येतं पराजितवान्। ग्रैण्ड् चेस् टूर् इत्याख्यायाः एतस्याः शृङ्खलायाः उपान्त्य-स्पर्धायाम् एषा तस्य प्रथमा विजयश्रीः अस्ति। सम्पूर्ण-क्रीडायां प्रज्ञानन्दः अत्युज्वल-प्रदर्शनं विधाय, अन्ततः च साम्यावस्थां विजय-स्थितौ परिणतवान्।

-------------------------------------------------------------

<u>राष्ट्रमण्डल-स्पर्धायाम्</u>

राष्ट्रमण्डल-स्पर्धायाम् भारतीय-दलेन नाइजिरियायाः लागोसनगरे तृतीयदवसे स्वायत्तीकृतानि पञ्चपदकानि ।

।। इति वार्ता: ।।